श्रीभगवानुवाच

अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः ।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥ १६.१॥

॥ ॐ ॥ पूर्वाध्याये 'निर्मानमोहा' (१५.५) इत्यादिना सङ्क्षेपेणोक्तस्य पुमर्थयोर्ज्ञानमोक्षयोः साधनस्य 'यततोऽप्यकृतात्मान' (१५.११) इत्यादिना चोक्तस्य उमर्थविरोधिनश्च देवासुरलक्षणरूपत्वात् तत्प्रपञ्चनमस्मिन्नध्याये क्रियत इति पूर्वसङ्गतिरध्यायभेदश्च ज्ञेयः । विरोध्युक्तिश्च साधनमनुतिष्ठता तत्त्यागोऽवश्यं ॥ अभयमित्यादिश्लोकत्रयेण । अभयं स्वतोऽन्यस्यान्यस्माच्च स्वस्य भयाभावः । 'यस्मान्नोद्विजते लोको लोकान्नोद्विजतेऽच यः' (१२.१५) इत्युक्तेः । सत्त्वसंशुद्धिः चित्तप्रसादः । ज्ञानयोगव्यवस्थितिः ज्ञानोपायनिष्ठता । दानं पात्रे द्रव्यादित्यागः । दम इन्द्रियनिग्रहः । यज्ञो ज्योतिष्टोमादिः । देवयज्ञपितृयज्ञादिर्वा । स्वाध्यायो वेदाध्ययनम् । तपो ब्रह्मचर्यादि । आर्जवं मनोवाक्कर्मस्वैकरूप्यम् ॥ १६.१॥

अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम् ।
दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ॥ १६.२॥

अहिंसा परप्राणावियोजनम् । सत्यं यथार्थवचनम् । अक्रोधः परपीडाकरचित्तविकाराभावः । त्याग औदार्यम् । शांतिः भगवन्निष्ठता । अपैशुनं परोपद्रवनिमित्तदोषाणां राजादेरकीर्तनम् । भूतेषु प्राणिषु दया परहितकरश्चित्तगतो धर्मविशेषः । परदुःखासहिष्णुत्वं वा । अलोलुप्तं विषयेषु रागाभावः । आत्महिंसकेष्वप्यविरोधो मार्दवं अक्रौर्यं वा । ह्रीरकार्यकरणे लज्जा । अचापलं स्थैर्यम् ॥ १६.२॥

तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता ।
भवन्ति संपदं दैवीमभिजातस्य भारत ॥ १६.३॥

तेजः परैरनभिभवः । क्षमा क्रोधाभावेन सह अपकर्तुरनपकृतिः । धृतिरनातङ्कः । शौचं मृत्तिकादिभिर्बाह्यशौचम् । भगवत्स्मृत्यादिनांऽऽतरशौचम् । अद्रोहः परवृत्त्यननुरोधः । नातिमानिता अहङ्काराराहित्यम् । एते गुणाः दैवीं देवसंबन्धिनीं संपदमभिजातस्य प्राप्तस्य भवंति । अभिरयं लक्षणेत्थंभूताख्यानेत्युक्तलक्षणार्थकप्रत्यर्थे वर्तते इति तस्य कर्मप्रवचनीयसंज्ञायां कर्मप्रवचनीययुक्ते द्वितीयेति द्वितीयोपपत्तिः । तथा चैत एव गुणाः मुमुक्षुणाऽवश्यमुपादेया इति भावः ॥ १६.३॥

दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च ।
अज्ञानं चाभिजातस्य पार्थ संपदमासुरीम् ॥ १६.४॥

त्यागायासुरलक्षणमाह ॥ दंभ इति । आत्माऽल्पत्वं ज्ञात्वाऽपि महत्त्वप्रदर्शनं दंभः । दर्पः सत्यपि भयकारणे मदात्तदभावदर्शनम् । अभिमानः प्रमाणातिक्रमः । क्रोधः परपीडाकरचित्तविकारः । पारुष्यं निष्ठुरत्वम् । आसुरीं संपदमभिजातस्येत्यस्य प्रागिवार्थः । तेन जातस्येत्यकर्मकत्वात्संपदमिति न द्वितीयानुपपत्तिदोषः ॥ १६.४॥

दैवी संपद्विमोक्षाय निबन्धायासुरी मता ।
मा शुचः संपदं दैवीमभिजातोऽसि पाण्डव ॥ १६.५॥

दैवसंपदादेः फलं संदर्शयन्नर्जुनस्यासुरस्वभावशङ्कां वारयति ॥ दैवीति । अभिजातेऽसि प्रागिवाथः । जातस्य तव दैवीसंपल्लक्षणमित्यर्थः । "वृक्षं प्रति विद्योतत" इत्यत्र वृक्ष इव प्रद्योतस्येति । अतो मा शुचः । शोकं मा कार्षीः । निबन्धनं नीचस्थाने तमसि निवासः । विमोक्षाय विविधमोक्षायेत्युक्त्या मोक्षस्य नानात्वमुच्यते ॥ १६.५॥

द्वौ भूतसर्गौ लोकेऽस्मिन्दैव आसुर एव च ।
दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु ॥ १६.६॥

ननु सर्गाणामतिबहुत्वाद्देवासुरयोरेवोक्तिः कथमित्यतः शुभाशुभफलाधिक्यादिभावत्वरूपपूर्वश्लोकोक्तोपाधिद्वयविवक्षया द्वयोरेवोक्तिरिति भावेनाह ॥ द्वाविति । दैव आसुरश्चेति द्वावेव प्राणिनां सर्गो सृष्टिभूतसर्गौ प्राणिस्वभावाविति वा । तदुभयजिज्ञासायामाह ॥ दैव इति । शृण्विति विस्तरश इत्यनुषङ्गः ॥ १६.६॥

प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः ।
न शौचं नापि चाऽचारो न सत्यं तेषु विद्यते ॥ १६.७॥

तदाह ॥ प्रवृत्तिमित्यादिद्वादशश्लोकैः । आसुरा जनाः विहिते प्रवृत्तिं निषिद्धे निवृत्तिं च न विदुः । तेषु शौचाचारसत्यानि न विद्यंते । तात्पर्यद्योतनाय नञ्त्रयोक्तिः ॥ १६.७॥

असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् ।
अपरस्परसंभूतं किमन्यत्कामहैतुकम् ॥ १६.८॥

किञ्च जगदसत्यम् । अत्र सत्यप्रतिष्ठेश्वरशब्दा विष्णुपराः । नञ् बहुव्रीहिः । जगद्विशरणकर्तृतया सत्यपदवाच्यविष्णुहीनमाहुः । स्थितिहेतुतया प्रतिष्ठापदोक्तविष्णुहीनमाहुः । अनीश्वरं स्वामिहीनमाहुः । जगत्सृष्ट्यादिकर्तारं ये न जानंति त इति चाहुरासुरजना इत्यनुषङ्गः । 'अपरस्परसंभूतं', 'अन्नाद्भवंति भूताणी'ति (३.१४) तृतीयोक्तदिशा परस्परसंभूतं न भवतीत्यर्थः । यद्वा जगदसत्यं सत्यं न मिथ्येत्यर्थः । अत एव, शुक्तिरूप्यवन्न प्रतितिष्ठतीत्यप्रतिष्ठं ज्ञानबाध्यम् । अनीश्वरं नियंतृहीनम् । अपरस्परसंभूतं परेभ्यः संभवहीनम् । एकस्मादेकस्य जनिर्नेति यावत् । किं तर्हिति प्रश्नस्योत्तरम् ॥ अन्यदिति । सदसद्भयामिति शेषः । सदसद्विलक्षणमित्यर्थः । केन जायत इत्यत उक्तम् । कामहैतुकं कामहेत्वविद्यापरिणामरूपम् ॥ १६.८॥

एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः ।
प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः ॥ १६.९॥

एतां दृष्टिमाश्रित्य नष्टात्मानः दुष्टचित्ताः अल्पज्ञानः घोरकर्मनिरताः जगतः अहिताः शत्रवः क्षयायानिष्टप्राप्तये कलियुगादौ प्रभवंति ॥ १६.९॥

काममाश्रित्य दुष्पूरं दम्भमानमदान्विताः ।
मोहाद्गृहीत्वासद्ग्राहान्प्रवर्तन्तेऽशुचिव्रताः ॥ १६.१०॥

दुष्पूरं दुःखेन पूरणीयं काममिच्छामाश्रित्य दंभमानमदैर्युक्ताः संतः मोहात् मिथ्याज्ञानस्वभावात् । कुशास्त्राभ्यासजन्यविपरीतनिश्चयादृन् गृहीत्वा (???)

आदायासदर्थान् ज्ञात्वेति वा ।अशुचिव्रताः क्षुद्रभोगाय प्रवर्तंते ॥१६.१०॥

चिन्तामपरिमेयां च प्रळयान्तामुपाश्रिताः ।
कामोपभोगपरमा एतावदिति निश्चिताः ॥१६.११॥

किञ्च प्रलयांतां मरणांतां अपरिमेयां परिमातुमशक्यां चिंतामुपाश्रिताः कामोपभोगपरमाः काम्यमानवस्त्वनुभव एव परमो येषां ते विषयभोगैकरताः एतावदैहिकमेव फलं नान्यदामुष्मिकमस्तीति निश्चयवंतः ॥१६.११॥

आशापाशशतैर्बद्धाः कामक्रोधपरायणाः ।
ईहन्ते कामभोगार्थमन्यायेनार्थसञ्चयान् ॥१६.१२॥

आशा एव पाशास्तेषां शतैर्बद्धाः कामक्रोधा एव परं अयनमेषां ते कामक्रोधपरायणाः ।कामभोगार्थं काम्यविषयानुभवार्थं अन्यानेन चौर्यादिनाऽर्थ-सञ्चयान्द्रव्यसमूहानीहंते वाञ्छंति ॥१६.११२॥

इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथम् ।
इदमस्तीदमपि मे भविष्यति पुनर्धनम् ॥१६.१३॥

चिंताप्रकारं दर्शयति ॥इदमित्यादिना त्रयेण ।इदं धनं अद्य मया लब्धं, इमं मनोरथं प्राप्स्ये प्राप्स्यामि ।इदं धनं अस्ति इदमपि धनं मे पुनर्भविष्यति ॥१६.१३॥

असौ मया हतः शत्रुर्हनिष्ये चापरानपि ।
ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान्सुखी ॥१६.१४॥

असौ शत्रुर्मया हतः अपरानन्यानपि शत्रून् हनिष्ये च । अहमीश्वरः परमेश्वरः भोगी ऐहिकामुष्मिकभोगसंपन्नः सिद्धः कृतकृत्यः बलवान्समर्थः ॥१६.१४॥

आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया ।
यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः ॥१६.१५॥

आढ्यः धनादिसंपन्नः अभिजनवान्कुलीनोऽस्मि ।मया सदृशोऽन्यः कोऽस्ति न कोऽपि ।यक्ष्ये यागादिधर्माननुष्ठास्यामि । भूरिदक्षिणान्नादि दास्यामि ।मोदिष्ये संतोषं प्राप्स्यामि इत्येवं

रूपेणाज्ञानेन विमोहिताः ॥ १६.१५ ॥

अनेकचित्तविभ्रान्ता मोहजालसमावृताः ।
प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ ॥ १६.१६ ॥

एवं चिंताप्रकारमुक्त्वा तेषां फलमाह ॥ अनेकेति । अनेक चिंतायुक्तमनसा विशेषभ्रांतिमंतः पुत्रमित्रादिविषयमोहाख्यजालेन समावृताः विषयभोगेष्वतितरामासक्ताः संतः अशुचौ नरके पतंति ॥ १६.१६ ॥

आत्मसंभाविताः स्तब्धा धनमानमदान्विताः ।
यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकम् ॥ १६.१७ ॥

यागादि कुर्वतां कथं नरके पात इत्यत आह ॥ आत्मेति । आत्मनैव स्वेनैव संभाविताः बहुमताः वयं पूज्या इति मन्यमाना इति यावत् । अत एव स्तब्धाः अनम्राः धननिमित्तगर्वदर्पाभ्यां उपेतास्ते अविधिपूर्वकं दंभेन स्वमहित्वप्रदर्शननिमित्तेन यज्ञैर्ज्योतिष्टोमादिभिर्यजंते नाम । न कुतार्थबुद्ध्या, अतो नरकप्राप्तिस्तेषां इति भावः ॥ १६.१७ ॥

अहंकारं बलं दर्पं कामं क्रोधं च संश्रिताः ।
मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः ॥ १६.१८ ॥

सर्वकर्मकारयितारं सर्वांतर्यामिणं त्वां कुतो न यजंत इत्यत आह ॥ अहङ्कारमिति । अहङ्कारादि संश्रिताः संतः आत्मदेहे परदेहेषु च नियामकतया स्थितं मां प्रद्विषंतः । यदि ईश्वरः कारयिताऽस्ति तर्हीदानीमकुर्वाणं मां कारयतु कुर्वाणं च विघातयतु इत्येवं भगवदपलापरूपप्रद्वेषं कुर्वंतः । अभ्यसूयकाः निर्दोषे दोषान्वदंतः गुणपूर्णे गुणहीनतां वदंतः, यजंत इत्यनुषज्यते ॥ १६.१८ ॥

तानहं द्विषतः क्रुरान्संसारेषु नराधमान् ।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥ १६.१९ ॥

नरके पतंतीत्येतावदेव न तेषां फलं, किंतु किञ्चित्कालं संसारमनुभूय पश्चान्नित्यनरकमपि मयैव प्रानुवंतीत्याह ॥ तानिति द्वाभ्यां । तान् 'प्रवृत्तिं च' इत्यादिनोक्तान्द्विषतः क्रूरान् अत एवाशुभान्नराधमान्संसारेषु तत्राप्यासुरयोनिषु अजस्रं पुनः पुनः क्षिपामि स्थापयामि ॥ १६.१९ ॥

आसुरीं योनिमापन्ना मूढा जन्मनिजन्मनि ।
मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम् ॥१६.२०॥

ततो मूढाः तामसस्वभावाः जन्मनि जन्मनि अनेकजन्मसु आसुरीं योनिमापन्नाः मामप्राप्यैवाधमां नित्यनरकलक्षणां गतिं यांति ॥१६.२०॥

त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥१६.२१॥

उक्तेषु पुमर्थविरोधिषु प्रधानदोषत्रयमवश्यं त्याज्यमित्याह ॥ त्रिविधमिति ।कामः क्रोधः लोभ इति इदं त्रिविधं नरकद्वारं नरकसाधनम् ।अत एव आत्मनो नाशनं अनर्थप्रापकम् । तस्मादेतत्त्रयं त्यजेत् ।ततश्च कारणाभावान्नरकाणामप्राप्तिरिति भावः ॥१६.२१॥

एतैर्विमुक्तः कौन्तेय तमोद्वारैस्त्रिभिर्नरः ।
आचरत्यात्मनः श्रेयस्ततो याति परां गतिम् ॥१६.२२॥

न केवलं कामादित्यागे नरकाप्राप्तिः परमपुमर्थप्राप्तिश्चास्तीत्याह ॥ एतैरिति ।तमोद्वारैर्नरकहेतुभिस्त्रिभिरेतः कामक्रोधलोभैर्विमुक्तो नरः आत्मनः श्रेयः पुमर्थसाधनमाचरति ।ततः परां गतिं मोक्षं याति ॥१६.२२॥

यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः ।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ॥१६.२३॥

श्रेयःसाधनानुष्ठाने अङ्गांतरं विधातुं तदकरणे बाधकं तावदाह ॥ य इति ।यः शास्त्रोक्तविधानमुत्सृज्य कामकारतः स्वेच्छामात्रेण यत्र क्वचित्प्रवर्तते स सिद्धिं पुमर्थोपायं नावाप्नोति । सुखमैहिकं परां गतिं मोक्षं वा नाप्नोति ॥१६.२३॥

तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ॥१६.२४॥

कुतः शास्त्रविध्यतिक्रमे संसिद्धिसुखाद्यभाव इति शङ्कां निरस्यन्नगांतरं विधत्ते ॥तस्मादिति ।यस्मादिदं कार्यमिदमकार्यमिति व्यवस्थायां ते तव विवेकिनः शास्त्रं प्रमाणम् ।तदतिक्रमे च दोषः तस्मादिह लोके शास्त्रविधानोक्तं कर्म कर्तुमर्हसि इति ॥१६.२४॥

इति श्रीमद्गीतार्थसङ्ग्रहे श्रीराघवेन्द्रयतिकृते

षोडशोऽध्यायः
